# kumarikavacham from Rudrayamala uttaratantra

# કુમારીકવચં રુદ્રયામલોત્તરતન્ત્રાન્તર્ગતમ્

## Document Information

Text title : kumArIkavacha.txt rudrayAmalottaratantrArgatam

File name : kumArIkavacha.itx

Category : kavacha, devii, durgA, devI

Location : doc_devii

Transliterated by : From Digital Library at http://muktalib5.org

Proofread by : Final proofread DPD

Description-comments : RudrayAmala uttaratantra paTalaH 9

Latest update : April 5, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# કુમારીકવચં રુદ્રયામલોત્તરતન્ત્રાન્તર્ગતમ્

આનન્દભૈરવ ઉવાચ –

અથાતઃ સમ્પ્રવક્ષ્યામિ કુમારીકવચં શુભમ્ ।
ત્રૈલોક્યં મઙ્ગલં નામ મહાપાતકનાશકમ્ ॥ ૧॥

પઠનાદ્ધારણાલ્લોકા મહાસિદ્ધાઃ પ્રભાકરાઃ ।
શક્રો દેવાધિપઃ શ્રીમાન્ દેવગુરુર્બૃહસ્પતિઃ ॥ ૨॥

મહાતેજોમયો વહ્નિર્ધર્મરાજો ભયાનકઃ ।
વરુણો દેવપૂજ્યો હિ જલાનામધિપઃ સ્વયમ્ ॥ ૩॥

સર્વહર્ત્તા મહાવાયુઃ કુબેરઃ કુઞ્જરેશ્વરઃ ।
ધરાધિપઃ પ્રિયઃ શમ્ભોઃ સર્વે દેવા દિગીશ્વરઃ ॥ ૪॥

ન મેરુઃ પ્રભુરેકાયાઃ સર્વેશો નિર્મલો દ્વયોઃ ।
એતત્કવચપાઠેન સર્વે ભૂપા ધનાધિપાઃ ॥ ૫॥

ત્રૈલોક્યમઙ્ગલકુમારીકવચમ્ –

પ્રણવો મે શિરઃ પાતુ માયા સન્દાયિકા સતી ।
લલાટોદ્ર્ધ્વં મહામાયા પાતુ મે શ્રીસરસ્વતી ॥ ૬॥

કામાક્ષા વટુકેશાની ત્રિમૂર્ત્તિર્ભાલમેવ મે ।
ચામુણ્ડા બીજરૂપા ચ વદનં કાલિકા મમ ॥ ૭॥

પાતુ માં સૂર્યગા નિત્યં તથા નેત્રદ્વયં મમ ।
કર્ણયુગ્મં કામબીજં સ્વરૂપોમાતપસ્વિની ॥ ૮॥

રસનાગ્રં તથા પાતુ વાગ્દેવી માલિની મમ ।
ડામરસ્થા કામરૂપા દન્તાગ્રં કુબ્જિકા મમ ॥ ૯॥

દેવી પ્રણવરૂપાઽસૌ પાતુ નિત્યં શિવા મમ ।
ઓષ્ઠાધરં શક્તિબીજાત્મિકા સ્વાહાસ્વરૂપિણી ॥ ૧૦॥

પાયાન્મે કાલસન્દષ્ટા પઞ્ચવાયુસ્વરૂપિણી ।
ગલદેશં મહારૌદ્રી પાતુ મે ચાપરાજિતા ॥ ૧૧॥

ક્ષ્રૌં બીજં મે તથા કણ્ઠં રુદ્રાણી સ્વાહયાન્વિતા ।
હૃદયં ભૈરવી વિદ્યા પાતુ ષોડશ સુસ્વરા ॥ ૧૨॥

દ્વૌ બાહૂ પાતુ સર્વત્ર મહાલક્ષ્મીઃ પ્રધાનિકા ।
સર્વમન્ત્રસ્વરૂપં મે ચોદરં પીઠનાયિકા ॥ ૧૩॥

પાર્શ્વયુગ્મં તથા પાતુ કુમારી વાગ્ભવાત્મિકા ।
કૈશોરી કટિદેશં મે માયાબીજસ્વરૂપિણી ॥ ૧૪॥

જઙ્ઘાયુગ્મં જયન્તી મે યોગિની કુલ્લુકાયુતા ।
સર્વાઙ્ગમમ્બિકાદેવી પાતુ મન્ત્રાર્થગામિની ॥ ૧૫॥

કેશાગ્રં કમલાદેવી નાસાગ્રં વિન્ધ્યવાસિની ।
ચિબુકં ચણ્ડિકા દેવી કુમારી પાતુ મે સદા ॥ ૧૬॥

હૃદયં લલિતા દેવી પૃષ્ઠં પર્વતવાસિની ।
ત્રિશક્તિઃ ષોડશી દેવી લિઙ્ગં ગુહ્યં સદાવતુ ॥ ૧૭॥

શ્મશાને ચામ્બિકા દેવી ગઙ્ગાગર્ભે ચ વૈષ્ણવી ।
શૂન્યાગારે પઞ્ચમુદ્રા મન્ત્રયન્ત્રપ્રકાશિની ॥ ૧૮॥

ચતુષ્પથે તથા પાતુ મામેવ વજ્રધારિણી ।
શવાસનગતા ચણ્ડા મુણ્ડમાલાવિભૂષિતા ॥ ૧૯॥

પાતુ માને કલિઙ્ગે ચ વૈખરી શક્તિરૂપિણી ।
વને પાતુ મહાબાલા મહારણ્યે રણપ્રિયા ॥ ૨૦॥

મહાજલે તડાગે ચ શત્રુમધ્યે સરસ્વતી ।
મહાકાશપથે પૃથ્વી પાતુ માં શીતલા સદા ॥ ૨૧॥

રણમધ્યે રાજલક્ષ્મીઃ કુમારી કુલકામિની ।
અર્દ્ધનારીશ્વરા પાતુ મમ પાદતલં મહી ॥ ૨૨॥

નવલક્ષમહાવિદ્યા કુમારી રૂપધારિણી ।
કોટિસૂર્યપ્રતીકાશા ચન્દ્રકોટિસુશીતલા ॥ ૨૩॥

પાતુ માં વરદા વાણી વટુકેશ્વરકામિની

ઇતિ તે કથિતં નાથ કવચં પરમાદ્ભુતમ્ ॥ ૨૪॥

કુમાર્યાઃ કુલદાયિન્યાઃ પઞ્ચતત્ત્વાર્થપારગ
યો જપેત્ પઞ્ચતત્ત્વેન સ્તોત્રેણ કવચેન ચ ॥ ૨૫॥

આકાશગામિની સિદ્ધિર્ભવેત્તસ્ય ન સંશયઃ ॥ ૨૬॥

વજ્રદેહી ભવેત્ ક્ષિપ્રં કવચસ્ય પ્રપાઠતઃ ।
સર્વસિદ્ધીશ્વરો યોગી જ્ઞાની ભવતિ યઃ પઠેત્ ॥ ૨૭॥

વિવાદે વ્યવહારે ચ સઙ્ગ્રામે કુલમણ્ડલે ।
મહાપથે શ્મશાને ચ યોગસિદ્ધો ભવેત્ સ ચ ॥ ૨૮॥

પઠિત્વા જયમાપ્નોતિ સત્યં સત્યં કુલેશ્વર
વશીકરણકવચં સર્વત્ર જયદં શુભમ્ ॥ ૨૯॥

પુણ્યવ્રતી પઠેન્નિત્યં યતિશ્રીમાન્ભવેદ્ ધ્રુવમ્
સિદ્ધવિદ્યા કુમારી ચ દદાતિ સિદ્ધિમુત્તમામ્ ॥ ૩૦॥

પઠેદ્યઃ શ ૃણુયાદ્વાપિ સ ભવેત્કલ્પપાદપઃ ।
ભક્તિં મુક્તિં તુષ્ટિં પુષ્ટિં રાજલક્ષ્મીં સુસમ્પદામ્ ॥ ૩૧॥

પ્રાપ્નોતિ સાધકશ્રેષ્ઠો ધારયિત્વા જપેદ્યદિ ।
અસાધ્યં સાધયેદ્વિદ્વાન્ પઠિત્વા કવચં શુભમ્ ॥ ૩૨॥

ધનિનાઞ્ચ મહાસૌખ્યધર્માર્થકામમોક્ષદમ્ ।
યો વશી દિવસે નિત્યં કુમારીં પૂજયેન્નિશિ ॥ ૩૩॥

ઉપચારવિશેષેણ ત્રૈલોક્યં વશમાનયેત્ ।
પલલેનાસવેનાપિ મત્સ્યેન મુદ્રયા સહ ॥ ૩૪॥

નાનાભક્ષ્યેણ ભોજ્યેન ગન્ધદ્રવ્યેણ સાધકઃ ।
માલ્યેન સ્વર્ણરજતાલઙ્કારેણ સુચૈલકૈઃ ॥ ૩૫॥

પૂજયિત્વા જપિત્વા ચ તર્પયિત્વા વરાનનામ્ ।
યજ્ઞદાનતપસ્યાભિઃ પ્રયોગેણ મહેશ્વર ॥ ૩૬॥

સ્તુત્વા કુમારીકવચં યઃ પઠેદેકભાવતઃ ।
તસ્ય સિદ્ધિર્ભવેત્ ક્ષિપ્રં રાજરાજેશ્વરો ભવેત્ ॥ ૩૭॥

વાઞ્છાર્થફલમાપ્નોતિ યદ્યન્મનસિ વર્તતે ।

ભૂર્જપત્રે લિખિત્વા સ કવચં ધારયેદ્ હૃદિ ॥ ૩૮॥

શનિમઙ્ગલવારે ચ નવમ્યામષ્ટમીદિને ।
ચતુર્દશ્યાં પૌર્ણમાસ્યાં કૃષ્ણપક્ષે વિશેષતઃ ॥ ૩૯॥

લિખિત્વા ધારયેદ્ વિદ્વાન્ ઉત્તરાભિમુખો ભવન્ ।
મહાપાતકયુક્તો હિ મુક્તઃ સ્યાત્ સર્વપાતકૈઃ ॥ ૪૦॥

યોષિદ્વામભુજે ધૃત્વા સર્વકલ્યાણમાલભેત્ ।
બહુપુત્રાન્વિતા કાન્તા સર્વસમ્પત્તિસંયુતા ॥ ૪૧॥

તથાશ્રીપુરુષશ્રેષ્ઠો દક્ષિણે ધારયેદ્ ભુજે ।
એહિકે દિવ્યદેહઃ સ્યાત્ પઞ્ચાનનસમપ્રભઃ ॥ ૪૨॥

શિવલોકે પરે યાતિ વાયુવેગી નિરામયઃ ।
સૂર્યમણ્ડલમાભેદ્ય પરં લોકમવાપ્નુયાત્ ॥ ૪૩॥

લોકાનામતિસૌખ્યદં ભયહરં શ્રીપાદભક્તિપ્રદ ।
મોક્ષાર્થં કવચં શુભં પ્રપઠતામાનન્દસિન્ધૂદ્ભવમ્ ।
પાર્થાનાં કલિકાલઘોરકલુષધ્વંસૈકહેતું જય ।
યે નામ પ્રપઠન્તિ ધર્મમતુલં મોક્ષં વ્રજન્તિ ક્ષણાત્ ॥ ૪૪॥

॥ ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને
કુમાર્યુપચર્યાવિન્યાસે સિદ્ધમન્ત્રપ્રકરણે
દિવ્યભાવનિર્ણયે નવમપટલે કુમારીકવચં સમ્પૂર્ણમ્ ॥

॥ પટલઃ ૯ ॥

From Digital Library at http://muktalib5.org

*kumarikavacham from Rudrayamala uttaratantra*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*